त्रैमासिकी / जून २०२५

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



वाराणसीपुरपतिं भज विश्वनाथम्

जून २०२५

# अनुक्रमणिका


| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | २ |
| पक्षिमित्राः भवाम । | ४ |
| सुभाषितम् | ५ |
| शिशुरामाष्टकम् | ६ |
| उत्तरभारते यात्रायज्ञः | ८ |
| उत्तरभारतयात्रा-मधुरस्मृतयः | १० |
| मम स्मृतिपथे... | ११ |
| बालरञ्जनी | १२ |
| शरभेश्वरः | |
| शब्दपटः | |
| रुचिरा | १३ |
| तस्मै पाणिनये नमः | १४ |
| अविस्मरणीयः अनुभवः | १५ |
| विनोदकणिका | १५ |
| अमूल्यरत्नं रतनटाटा | १६ |
| योगविषये किञ्चित् ... | १८ |
| उत्तराणि | १८ |

## ॥ गुरूपदेशः॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

शरणागतिप्राप्त्यर्थं मन्त्रजपः इति अपि एकं साधनम् अस्ति। परन्तु जपः सश्रद्धं भवेत्। मन्त्रजपसमये साधकस्य मनसि नितान्तविश्वासः आवश्यकः यत् एषः मन्त्रः अतीव प्रभावशाली अस्ति यः मां भगवन्तं प्रति प्रापयत्येव ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

साधकस्य उपासना अर्थपूर्णा भवति यदा तस्य लक्ष्यम् आत्मज्ञानप्राप्तिं प्रति केन्द्रितम् अस्ति । योग्यभावनया कृतकार्यात् जनितः दिव्यानन्दः प्रत्येकस्मिन् कार्ये अस्माभिः प्राप्तव्यः। ततः यदा रामनामजपः क्रियते तदा सः मनसि अपि कर्तुं शक्यः ।

गुरूपदेशानुवादः - सुजाता हळदीपुर , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः। ॐ श्रीभवानीशङ्कराय नमः। ॐ श्रीमात्रे नमः।

**ऋषीणां परमं गुह्यमिदं भरतसत्तम।**

**तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते॥**

अस्माकं प्राचीनपरम्परायां पुण्यार्जनाय , आत्मशुद्धये , आध्यात्मिकपथि प्रगतिं कर्तुं च यात्रा एकं साधनम् उच्यते । अद्भुत-प्राकृतिक-लक्षणेन वा देवदेवतानाम् ऋषीणां च निवास-कारणात् वा कानिचित् स्थलानि पवित्र-तीर्थस्थलानि इति मन्यन्ते । हिमाच्छादित-उत्तुङ्ग-पर्वतानाम् उदात्तता , बृहत्सरोवराणां भव्यता , विशालनदीनाम् औदार्यपूर्ण-ओजस्विता इत्यादयः अस्मान् सहजतया दिव्यत्वं प्रति समाकर्षितुं सम्प्रेरकाः भवन्ति । केषाञ्चित् पवित्र-तीर्थस्थलानां दर्शनेन मोक्षः वा पुनर्जन्मचक्रात् मुक्तिः प्राप्यते इति मान्यता । उच्यते,

**अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।**

**पुरी द्वारवती ज्ञेया सप्तैता मोक्षदायिकाः॥**

तीर्थयात्रायां साधकस्य आन्तरिक-यात्रा अपि प्रचलन्ती अस्ति । प्रासादिक-मन्दिराणाम् उज्ज्वलता न तु केवलं साधकस्य मनः प्रसन्नं प्रफुल्लितं च करोति अपि तु तत्रस्थिता सकारात्मक-ऊर्जा तस्य उत्साहं संवर्ध्य तं दिव्यतायाः समीपं नयति।

मार्चमासे अस्माकं परमपूज्य-सद्योजात-शङ्कराश्रम-गुरुवर्याणाम् अनुग्रहेण साधकसमूहेन गुरुवर्यैः सह उत्तरभारतस्य कानिचन महत्त्वपूर्णतीर्थस्थलानि संस्पृष्टानि ।

अस्माकं परमसौभाग्यं यत् गुरुवर्यैः सह अस्माभिः श्रीकाशीविश्वेश्वरदेवस्य दर्शनं सम्प्राप्तम् । महति प्रत्यूषे

परमपूज्य-गुरुवर्यैः कृतं शिवलिङ्गस्य अभिषेक-पूजनं साक्षात् दृष्ट्वा अस्माभिः अपूर्वधन्यतायाः अनुभूतिः सम्प्राप्ता । अनन्तरं प्रातःकालस्य नीरव-निरभ्र-वातावरणे परमपूज्य-गुरुवर्याणां शिवभजनस्य मधुरस्वरैः मन्दिरस्य सम्पूर्णः परिसरः परिव्याप्तः । तस्मात् जनितस्पन्दनैः दिव्यतायाः पराकाष्ठा सम्प्राप्ता । प्रत्येकः तस्मिन् रममाणः सम्भूय श्रद्धया अनुगातुं प्रारभत । अलौकिक-आनन्दस्य इयं तु एका अन्यतमा अनुभूतिः एव । शब्दातीता अविस्मरणीया च।

अस्मिन् अङ्के यात्रायां सहभागं गृहीतैः कैश्चित् साधकैः प्रेषितानां लेखानां समावेशः वर्तते।

**प्रसीद सच्चिदानन्द निग्रहानुग्रहे रत ।**

**ऐश्वर्यजलधे शम्भो भूयो भूयः प्रसीद मे ॥**

इति सम्प्रार्थ्य इदं पत्रिकापुष्पं श्रीचरणयोः समर्पयामः।

सम्पादिका

## चिन्तनम्

**– वैशाली नाडकर्णी , पुण्यनगरी**

गीर्वाणप्रतिष्ठया आयोजिते चिन्तने अधोलिखितं सुभाषितम् अधिकृत्य नैकैः स्वविचाराः प्रकटिताः।

**क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।**

**अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥**

**अस्य चिन्तनस्य सारांशः –**

यस्य हस्ते ' क्षमा ' नाम आयुधमस्ति तस्य दुष्टजनः किमपि कर्तुं न शक्नोति । तृणरहितभूमौ पतितः अग्निः स्वयमेव शाम्यति। यथा तृणशून्या भूमिः अग्निं प्रज्वालयितुं पोषका नास्ति तथैव दुर्जनस्य दुष्कृत्यस्य प्रतिकारः क्षमारूपिणा शस्त्रेण कृतः चेत् क्षोभादयः निष्प्राणाः भवन्ति यतः तान् उद्दीपयितुं किमपि प्रबलकारणं नास्ति।

कमपि दुर्वर्तनं प्रति क्रोध-वैरपूर्णभावनया विना कृतः प्रतिकारः क्षमा इति उच्यते।

कोऽपि अज्ञानतः त्रुटिं वा अपराधं वा कृत्वा तस्य विषये दृढानुतापम् अनुभवति, पुनः न कर्तव्यम् इति निश्चित्य च क्षमायाचनां करोति सः एव क्षन्तव्यः। यदि कोऽपि ज्ञानतः त्रुटिं वा अपराधं वा कृत्वा , वारं वारं पीडयति तर्हि तत् सहनं न करणीयम् । तस्य निश्चयेन परिहारं कर्तुम् उपायं योजयित्वा स्वरक्षणं करणीयम् ।

क्षमा अनिवार्या अस्ति चेत् मनसि कोपं वा द्वेषं धारयित्वा प्रतीकारः न कर्तव्यः। अस्माकं मनःशान्त्यर्थं तं क्षन्त्वा , तां घटनां विस्मृत्य च पुनः उत्साहेन अग्रे गन्तव्यम्। क्षमितुं तु कठिनं ततःपरं तस्य विस्मरणं कर्तुम् अधिकं क्लिष्टम् । किन्तु अस्माकं मनःशान्त्याः आरोग्यस्य च कृते इदम् अत्यावश्यकम् अस्ति।

अस्माकं दृष्टिः कीदृशी अस्ति  तदनुसारम् अस्माकं भावना भवति। यः क्षमां करोति तस्य मनसि प्रतिकूलाः भावनाः न भवन्ति । तस्मिन् विवेकबुद्धिः अपि आवश्यकी। कदाचित्   क्षमा-भावना विवशतायाः वा आत्मबलात् वा उद्भवति। क्षमा दौर्बल्यात् कदापि न प्रभवति अतः क्षमा मनोबलस्य प्रतीकं खलु।

येषां जनानां मनः शान्तं निर्मलं करुणामयं च अस्ति ते सहजतया क्षमां कर्तुं शक्नुवन्ति यतः ते कमपि दुर्जनं वा शत्रुं वा इति न मन्यन्ते। एतेन कारणेन एव कल्मषं  निर्गच्छति , नकारात्मकभावनाः अपि अपगच्छन्ति। परस्परसम्बन्धाः दृढाः भवन्ति।

यत्र क्षमा अस्ति तत्र अहङ्कारः नास्ति। यत्र समर्पणं भवति तत्र  विनयपूर्वकं  क्षमायाचना शक्या । वस्तुतः वयं सर्वे  सामान्यमानवा: क्वचित् अज्ञानतः कमपि दोषं कर्तुं शक्नुमः। तदर्थम् एव पूजायाः स्तोत्रपठनस्य च पश्चात् क्षमायाचना करणीया। यदि कोऽपि निरागसभावनया दुष्कृतिं करोति तर्हि तस्य कृते क्षमा अवश्यं कर्तव्या।

पृथ्व्याः अन्यत् नाम क्षमा इति कथ्यते। यथा पृथ्वी अस्माकं  दुष्कार्याणि सोढ्वा सदैव क्षमां करोति तथा अस्माभिः अपि तथैव भवितुं प्रयत्नाः करणीयाः। एतत् शक्यं भवति चेत् अस्माकं समस्याः न्यूनीभवन्ति ।

दुर्जनः कः?
अस्मिन् लोके सर्वे जनाः वस्तुतः सज्जनाः एव भवेयुः। परन्तु कस्याञ्चित् परिस्थित्यां कोऽपि दुराचारान् कर्तुम् उत्तेजितः भवति यथा निर्धनत्वम् ,  असहायता , पूर्वसंस्काराणां प्रभावः वा परपीडनात् जनिताः आनन्दप्राप्त्यर्थादयः स्वभावदोषाः ।

कोऽपि कस्मात् कारणात् अस्मान् पीडयति इति सम्यक् ज्ञात्वा एव क्षन्तव्यम्। यदि कोऽपि ज्ञानतः वारं वारं पीडयति तर्हि न क्षन्तव्यः। यदा परीक्षणं कृत्वा क्षम्यते तदैव क्षमानामकम् आयुधम् इति यथार्थं भवति।

चिन्तनसमये एतेषां सुभाषितानां सौन्दर्यम् अपि आस्वादितम् -

**क्षमा बलम् अशक्तानां शक्तानां भूषणं क्षमा  ।**

**क्षमा वशीकृते लोके क्षमया किं न सिद्ध्यति ॥**

"To err is human, to forgive is divine"- by Alexander Pope in 'An essay on Criticism.'

# पक्षिमित्राः भवाम ।

– शिल्पा मुद्गल, मुम्बई

'द्वि टुडु! द्विडि टुडु !' इति ध्वनिः मम कर्णे पतितः । एषः मधुरः स्वरः समीपतः एव प्रभवति इति ज्ञात्वा तत्क्षणमहं वातायनं प्रति धाविता । यथा अपेक्षितं तत्र कृष्णचूडः उपविष्टः आसीत् । मम पुष्पसस्यानां कुण्डकानाम् अधः सञ्चितं जलं पातुम् आगतः आसीत् सः । तेन एकस्मात् पात्रात् किञ्चित् जलं पीतं, ततः मस्तकम् उन्नीय आनन्देन कूजता अन्यत् पात्रं प्रति उड्डितम् । एवं पुनः पुनः कुर्वन् आसीत् सः । अहं जवनिकायाः पृष्ठे निलीय दूरादेव तस्य केलिं दृष्ट्वा प्रसन्नताम् अन्वभवम् ।



गृहस्य वातायनात् पक्षिणां निरीक्षणं तेषां छायाचित्रग्रहणं च मम प्रियः छन्दः । अस्माकं भवनस्य प्राङ्गणे बहवः वृक्षाः पुष्पसस्यानि च सन्ति । अतः नैके पक्षिणः चित्रपतङ्गाः च सर्वदा दृश्यन्ते ।

मुम्बई - महानगरे स्थितायामपि गृहतः एव खगानाम् उपद्वादश प्रकारान् द्रष्टुं शक्नोमि - एतत् मम अहोभाग्यम् । गृहकार्येषु व्यस्ता चेदपि, बहिः खगानां शब्दे मम अवधानं भवति- अपि कस्य खगस्य स्वरः श्रूयते ? इति । कतिपयाः खगाः मम



वातायनम् आगत्य पुष्परसं भुञ्जन्ति जलं पिबन्ति च । तेषु एकः कृष्णचूडः ।

लघुकायस्य अस्य मस्तकं कृष्णवर्णीयं, शरीरं धूम्र-कपिशं च । कृष्णवर्णीया चूडा तस्य मस्तकं भूषयति अतः सः कृष्णचूडः इति ज्ञायते । पुच्छसमीपे अवस्करभागे रक्तचिह्नं वर्तते येन Red-vented Bulbul इति तस्य आङ्ग्लनाम यथार्थमेव । तस्य वैज्ञानिकनाम Pycnonotus cafer इति । उष्णदेशवासी सः दक्षिण-आशिया-खण्डे भारत-श्रीलङ्का-बर्मा-देशेषु तथा दक्षिण-पश्चिम-चीनदेशे विद्यते ।

गानप्रियः अयं खगः । ननु तस्य मधुरालापः शीश्कारः निनर्दः च श्रवणीयाः । पक्षिणी तथा नरपक्षी, उभौ समानरूपिणौ । मार्चमासतः सप्टेम्बरमासपर्यन्तं तयोः प्रसवनकालः । तदा उभौ वृक्षेषु गुल्मकेषु च मधुरं कूजन्तौ क्रीडन्तौ दृश्येते ।

एकदा एप्रिलमासे मम वातायनात् दृश्यमाने एकस्मिन् वृक्षे अहं कृष्णचूड-दम्पतिं दृष्टवती । तयोः एकः सर्वदा तत्र एव तिष्ठति स्म । वृक्षे तयोः नीडं स्यात् इति अनुमानं कृतवती । सम्यक् अनुमितं मया । नीडे अण्डानि वा शावकाः वा भवेयुः । तस्मिन् वृक्षे काकाः आगच्छन्ति चेत् कृष्णचूडः सतर्कः भवति स्म तान् निवारयितुं सर्वथा प्रयत्नं करोति स्म । लघुकायः अपि सः तेषां रक्षणार्थम् अस्मत्तः बृहत्पक्षिणा सह योद्धुं सज्जः आसीत् । खलु हृदयङ्गमं तत् दृश्यम् ।

अहं मम वातायनात् बहिः काकानां कृते अन्नं



स्थापयामि । कृष्णचूडस्य कुटुम्बमपि तद् अन्नं खादितुम् आगच्छति स्म । आरम्भे जनकः अथवा जननी स्वचञ्चुकायाम् अन्नकणानि गृहीत्वा उड्डयते स्म । परं साक्षात् नीडम् अगत्वा अन्यवृक्षे शाखातः शाखाम् उड्डीय, परितः किमपि सङ्कटं नास्ति इति दृढीकृत्य एव स्वनीडं प्रति गच्छति स्म ।



मासानन्तरं बालकृष्णचूडः पितृभ्यां सह अन्नं खादितुं मम वातायनम् आगतवान् । यावत् माता शावकाय अन्नं खादयति तावत् पिता अनतिदूरं स्थित्वा अत्र तत्र पश्यति स्म । काकः वा सारिका वा दृश्यते चेत् झटिति एव सूचयति स्म, ततः त्रयोऽपि विना विलम्बम् उड्डयन्ते स्म । एवं सप्ताहं यावत् प्राचलत् । ततः शावकः एकाकी अन्नं खादितुम् आगतवान् । केभ्यश्चित् दिनेभ्यः अनन्तरं न शावकः आगतः न वा तस्य पितरौ । प्रायः ते निवासाय अन्यत्र गताः।

मम समीपे च अवस्थितानि केवलं कानिचन छायाचित्राणि तथा च सुमधुराः स्मृतयः। द्वि टुडु !

## सुभाषितम्

**- श्यामला हेब्ले , बेङ्गलूरु**

**शास्त्राण्यधीत्यापि भवन्ति मूर्खाः**

**यस्तु क्रियावान् पुरुषः स विद्वान् ।**

**सुचिन्तितं चौषधमातुराणां**

**न नाममात्रेण करोत्यरोगम् ॥**

**भावार्थः -**

शास्त्राध्ययनानन्तरम् अपि जनाः कदाचित् मूर्खाः एव स्युः। यः तत् अर्जितज्ञानं प्रयुज्य व्यवहारं करोति सः एव विद्वान् । सुविचिन्त्य औषधं केवलं तस्य नाममात्रेण रुग्णं व्याधिमुक्तं न करोति ।

सर्वे शास्त्राणि अधीत्य तेषु निष्णाताः अपि भवितुम् शक्नुवन्ति। परन्तु यदा कोऽपि शास्त्राणि उत्तमरीत्या गुरुद्वारा अधीत्य निपुणः भूत्वा , तस्य प्रयोगः कथं करणीयः इत्यपि जानाति , तदा एव सः विद्वान् भवति । जीवने व्यावहारिकस्तरे विद्यायाः शास्त्राणां वा सम्यग्रीत्या प्रयोजनं भवति चेदेव अधीतस्य शास्त्रस्य गरिमा वर्धते। यथा सम्यक् विचिन्त्य उक्तस्य औषधस्य केवलं नामश्रवणमात्रेण रुग्णः स्वस्थः , व्याधिमुक्तः न भवति किन्तु तस्य औषधस्य सेवनम् आवश्यकम् । तथैव जीवने कल्याणप्राप्त्यर्थे केवलं शास्त्राणाम् अध्ययनं न पर्याप्तं , किन्तु तस्य ज्ञानस्य उत्तमरीत्या प्रयोगः अपि आवश्यकः।

# शिशुरामाष्टकम्

-अङ्कुर नागपाल , दिल्ली

नलिनविकसिताक्षः सत्कृपादृक्कटाक्षः[१]
मुदितसुजललेखः[२] क्रन्दनश्रौतरेखः[३] ।
विलसतु शिशुरामो लीलया श्यामलाङ्गः
मनसि मनसिजारे[४] रीडितो ह्यन्तरङ्गः ॥

* * * अथाष्टकम् * * *

पूर्णेन्दोस्सदृशं प्रसन्नममलं यस्यास्यमस्मद्दृशां
दृश्यं दृश्यमनोहरं हरिहरीशाभ्यां सदाऽऽलक्षितम् ।
रुद्राध्यायसुधावचो गुरुमुखाच्छ्रुत्वा मुदा योऽर्भकः
सोऽस्माकं गुरुसेविनां विजयताच्चूडामणिः सर्वदा ॥१॥
यद्देहे जनकात्मजा भगवती तन्नित्यसङ्गोत्सुका
लावण्यादिगुणोत्तरङ्गलहरी गुप्त्या रमन्ती रमा ।[५]
वन्दे तं रघुनन्दनं शिशुवरं क्रीडन्तमानन्दितं
श्यामं काममनोभिराममममलं कामारिकामास्पदम् ॥२॥
दृष्टा शाङ्करसूत्रभाष्यवितता रत्नप्रभा वा पुन-
र्भाष्यादीनि जगद्गुरोर्भगवतः कण्ठस्थितानि श्रमात् ।
अदृष्टाऽऽत्मविचिन्तने शिशुहरेः शुद्धा च दन्तावलिः
किं नुः कार्यमथो करिष्यति परं सिद्धान्तमुक्तावलिः[६] ॥३॥
आदौ यत्पदनूपुरोदितममुं श्रुत्वा समाधौ रवं
चक्रे वेदविदुत्तमाश्रयरवो[७] रामायणं भार्गवः[८] ।
यद्गाथाम्बु उपास्पृशच्च[९] विदुषां काव्याम्बुवाहोऽचिरा-
ज्जातो[१०] व्यासमुनिर्नमोऽस्तु शिशवे तस्मै परब्रह्मणे ॥४॥
यं द्रष्टुं परमेश्वरः पुररिपुर्दैवज्ञलिङ्गी[११] सुधीः
सम्भूयात्मरतिश्चचार भगवान् साकेतमार्गान्तरे ।
तं रामं विलसन्तमत्र शिशुकं स्वात्मावतारस्थले
पश्यन्तः सफलेक्षणा भुवि भृशं भक्त्यार्द्रचित्ता जनाः ॥५॥
यज्झञ्झञ्कृतिरावसन्दितवपुर्वेदान्तविज्ञानिनो

ह्यद्वैतात्मविचिन्तनेशसमतां श्रौतार्थलक्ष्याङ्गताः।
नित्यं तच्छिशुराघवाङ्गविलसत्स्वर्णाङ्गदीया ध्वनी
रक्षेन्मादृशमल्पपुण्यपदवीकं तामसं निर्धनम् ॥६॥
मायामात्रमिदं[१२] शुकस्य वचनं वेदान्तिभिश्चोदितं
वाचा तत्कथनं विना ह्यनुभवं वैकल्यकं निश्चितम् ।
इत्येवंसति राघवे शिशुवरे रागानुगा भावना
न स्याच्चेद्भविताऽविताऽवनितले कः शान्तिदाता मम ॥७॥
श्रीशारीरकभाष्यपाठविपणी मोहाग्निदग्धात्मना
भोगी धर्मध्वजोऽपि सन् स्ववचसा योगात्मवादोत्सुकः ।
योऽहम्भेदसमुद्रमग्नमनसाऽऽशङ्काकलङ्काङ्कितः
कश्चिच्छङ्करकिङ्करोऽङ्कुरकविर्याचे रतिं राघवे ॥८॥

* * * इत्यष्टकम् * * *

कस्त्वं ब्रह्म च किं पुनः श्रुतिनुतं नैतद्धि दृश्यं शृणु
मायाशक्तिविलासतस्तव पुरस्तत्सङ्गहीनः श्रुतः ।
नूनं सत्यमतस्तु कल्पितदिशा त्वय्येव दृष्टो भिदा
एवं भाषत ईश्वरः शिशुहरिः सर्वान् सदा रक्षतात् ॥[१३]

॥ नारायणस्मृतिः ॥

१. सत्सु एव कृपया दृक्कटाक्षो यस्य, सः।
२. मुदिता सुजलानां कमलपुष्पाणां लेखा येन, सः; पुष्पाण्यपि भगवन्तमवलोक्य विकसन्तीत्याशयः।
३. यस्य क्रन्दनमेव श्रुतीनां चरमो रेखा/मर्यादा, सः; सर्वा अपि श्रुतयो भगवतो शिशुरामस्य रुदने सीमिताः।
४. मनसिजः कामदेवस्तस्यारिः शिवो मनसिजारिः; तस्यैव।
५. वस्तुतः यादृशी सौम्यता शिशुराघवे दृश्यते, न तादृशी भाति शिशुकृष्णे; यतो हि जानकीदेव्या भगवतो राघवस्य शिशुतनोश्चाञ्चल्यं निरुद्धं तदङ्गावेशेनेति भावदर्शनम्। भगवतो यत्सर्वं लावण्यादिकं भाति, तत्सर्वं भगवत्या एव सान्निध्यात्। श्रीसीतारामयोरत्र नित्यसंयोगः स्मृतः; "अनन्या राघवेणाहं भास्करेण यथा प्रभा" (वाल्मीकीयरामायणे 5.21.16) इत्यत्र।
६. "कृतोपास्तीनामात्मदर्शनं सुलभम्" इतिसम्प्रदायोऽत्र ऊह्यम्।
७. वेदविदुत्तमानां [पण्डिताम्] आश्रयो रवो [रामायणाख्याः] यस्य स वेदविदुत्तमाश्रयो वाल्मीकिः।
८. अत्र भार्गवो नाम वाल्मीकिः; "वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः" (मात्स्ये 12.61) इतिस्मरणात्।
९. "पठ रामायणं दिव्यं काव्यबीजं सनातनम् ... रामायणं पाठितं मे प्रसन्नोऽस्मि कृतस्त्वया। करिष्यामि पुराणानि महाभारतमेव च" इत्यादयो ह्माण्डपुराणस्थाः (1.30.47-55) श्लोका अत्र सङ्केतिताः; यत्र ब्रह्मण आज्ञया भगवतो वाल्मीकेश्चरणयोः पपाठ रामायणं वेदव्यासः।
१०. व्यासोऽप्यन्यानां कवीनामाद्याचार्यः; "सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति" (महाभारते 1.1.108) इतिस्मृतेः।
११. द्रष्टव्याऽत्र श्रीतुलसीदासगोस्वामिपादानां गीतावली (1.17)।
१२. "मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि" इत्याह भगवान् शुकदेवः श्रीमद्भागवते (12.4.25)।
१३. पद्येऽस्मिन् संवादः = [भगवन्तं शिशुरामं पृच्छति जीवः—] कस्त्वम्? [रामः=] अहं ब्रह्म। [जीवः=] तत्पुनः किम्? [रा=] श्रुतिनुतम्। [जी=] न हि तद् दृश्यम्। [रा=] शृणु! मायाशक्तिविलासतः तव पुरः दृश्योऽहम्; [जी=] परं त्वं तु तत्सङ्गहीनः/मायासङ्गहीनः श्रुतो वेदेषु, तर्हि कथं त्वं मायातीतं ब्रह्म? [रा=] नूनं सत्यम्, अतस्तु कल्पितदिशा भिदा त्वयि एव दृष्टोऽस्मि [वस्तुतः स्वरूपदृष्ट्या त्वमेव अहमस्मीति]—एवं भाषते य ईश्वरः शिशुहरिः, स सर्वान् सदा रक्षतादिति।

# उत्तरभारते यात्रायज्ञः

– कृष्णानन्द मङ्कीकर , मुम्बई

द्विवर्षपूर्वं वयं केचन जनाः गुरुकृपावर्षपातेन क्लिन्नाः तृप्ताश्च । स अवसर उत्तर-भारत-यात्रा नाम्ना ज्ञातः । इदानीमपि उत्तरभारतस्य सूरत-जयपुर-चित्तोरगढनगरतः आरभ्य, मथुरा-अयोध्या-काशीपर्यन्तमियं यात्रा प्रावर्तत ।

द्विवर्षपूर्वम् उत्तरभारत-यात्रासमये एकः श्लोकः स्फुरितः गुरुकृपया एव । तमुद्धर्तुं मोहः त्यक्तुमसमर्थ एव अहं , यतः यदुक्तं तस्मिन्समये तत् अद्यापि सुष्ठु एव । तदर्थमुचितमेव पुनरुद्धरणमिति मन्ये ।

पश्यन्तु ,

**" यदा ग्रीष्मे काले तपनद्युतिः तदा या दुष्करा भविता ।**
**( तपनद्युतिः इति सूर्यस्य आतपस्य प्रखरं तेजः )**


**अकस्मात्तत्रैषो यदि भवति घनः सान्द्रमेघः कृपालुः ।**

**शीतो वातः प्रवहति यदा नागराणां सुखाय ।**

(तथैव) **पुण्या यात्रा पुनरुपनता पुण्यश्लोकप्रसादात् ॥"**
**( पुण्यश्लोकाः इति सद्गुरूणां विशेषणम् )**

यथा सूर्यप्रभावेण अतितरे उष्णे एकस्मिन्दिवसे आकस्मिकः वर्षपातः न केवलं सुखाय भवति, किन्तु तदुत्थितः मृद्गन्धः चिरकालं संस्मरणीय एव । इदमनुभूतमस्माभिः अत्रापि । लखनउ-नगर्याम् एकम् अतिआतिथ्यशीलं दाम्पत्यमस्ति -- दीप्तिमा तथा गुन्जन-हॉसङ्गडी नाम्ना । एतस्मिन्नगरे अस्माकं सर्वजनानां कृते माध्याह्न-भोजनस्य आयोजनम् एताभ्यां कृतमासीत् । ( वयं सर्वे प्रायः अशीत्योत्तर-शताधिकाः आस्म । )

वयं यदा लखनउ-नगरीं गतवन्तः तदा दीप्तिमा-भगिन्या उक्तं यत् सा प्रार्थयन्ती आसीत् यत् अत्युष्णतापमानस्य



उपशमार्थं यदि लघुजलधारासिञ्चनं भवेत् तर्हि कियत्सुखकरं भवेदिति । तस्याः इच्छामनुमोदनं प्रदाय एव वरुणराज्ञा कृत-शीतलजलवर्षपातेन आसमन्तः सुशीतलोऽभवत् । गुरुकृपया एव प्राप्ते अस्मिन् अवसरे वयं सर्वे गुञ्जनमहोदयस्य तथा दीप्तिमाभगिन्याः आतिथ्येन अतीव मुदिताः उपकृताश्च ।

भगवत्पादानामागमनसमये, लखनउ-नगर्यां यः अ-वर्षाकालोत्पन्नः पर्जन्यः अभवत्, सः आकाशस्थ देवतानामाशिषः एव इति मन्यामहे । तदुपरि आकाशे इन्द्रधनुरपि उद्भूता। धन्याः वयं , यदेवंविधाः शुभसङ्केताः दृष्टा अस्माभिः। कियत्पुण्यमयी इयं यात्रा इति विचिन्त्य विस्मिताः वयम् । पुनश्च किङ्कारणं

विस्मयस्य अत्र? विस्मयस्य कारणमेव नास्ति यतः गुरुकृपा सर्वपुण्यस्य महाकारणमेव । अत्र केवलम् आनन्दः एव ।

तथैव इयं यात्रा, या पुण्यश्लोकसद्गुरोः प्रसादात् , अस्माकं भाग्ये निहिता, सा च अस्मत्प्रारब्धकर्मक्षयायैव प्राप्ता इति वयं सर्वे मन्यामहे, इति मे मतिः। एतस्याः यात्रायाः पुनःपुनः पुण्यस्मरणं , प्रथमवर्षादिनस्य मृद्गन्धस्मरणमेव । यद्गन्धः पुण्यगन्ध इत्युच्यते – "पुण्यो गन्धः पृथिव्यां च" इत्युक्तं भगवता स्वयं गीतायाम् । तत्स्मरणं अस्माकं मनसि चिरकालं वसेदिति भगवत्पादयोः प्रार्थना। अस्माकं प्रारब्धकर्माणामनुभवः एव ग्रीष्मऋतुः तथा इयं यात्रा तु उपरि उल्लेखितः वर्षाकाल एव इति संस्मृत्य संस्मृत्य उपर्युक्तं श्लोकं पठेयुः ।

अस्मिन् यात्रासत्रे वयं मथुरा-अयोध्या-काशीनगरीः आगत्य, पुण्यदर्शनानुभूतिमकुर्म । इयं यात्रा न केवलं यात्रा, अपितु एकः यात्रायज्ञः एव इति मन्ये । मथुरानगर्यां कृष्णस्य बालरूपं तथा च राधायाः कृष्णं प्रति अत्युच्च-प्रीत्याविष्कार-रसस्य वर्णनं श्रुत्वा दृष्ट्वा च धन्याः वयम् । तथा च रसखान-नामकस्य भक्तस्य अद्वितीयभक्त्याः वर्णनमपि अस्माभिः श्रुतम् । तस्य संस्मरणस्थलेऽपि गताः वयम् । सर्वोपरि , मथुरायां यमुनायाः , अयोध्यायां शरयूनद्याः तथा च काश्यां गङ्गायाः अस्माकं सद्गुरोः करकमलाभ्यां कृतानाम् आरतीः द्रष्टुं देवदुर्लभः अवसरः अस्माभिः प्राप्तः । कथं वर्णयामः अस्माकं धन्यताम् आनन्दञ्च अस्मिन्नवसरे इति न जाने ।

श्रीमद्-हनुमद्-दर्शनेन द्वितीयं सत्रमारब्धम् । अस्मिन्सत्रे श्रीरामजन्मभूम्याः सुदर्शनमस्माकं भाग्ये निहितम् । तदुपरान्तं शरयूनद्याः आरतिः गुरुवर्याणां करकमलाभ्यां सम्पन्ना ।

तृतीये सत्रे काशीविश्वेश्वरस्य दर्शनं, गङ्गायां नौकाविहारः तथा च तटस्थितानामनेकानां सोपानमार्गाणां दर्शनं, गङ्गानद्याः आरतिः तथा च श्रीविन्ध्यवासिनी-देव्याः दर्शनं कृत्वा कृतार्थाः अभवाम वयम् । स्थलाभावे सम्पूर्णं यात्रावर्णनं कर्तुं न शक्यं किन्तु सम्पूर्णा यात्रा एवमेव भगवत्पादसन्निधौ कर्तुमलभ्यलाभान्विताः धन्याश्च वयम् ।

अलीगढ-ग्रामे विवेकानन्द-शिक्षासङ्कुले गुरुवर्याणां यथोचितः सत्कारः तदुपरान्तं गुरुवर्याणामाशीर्वचनं तथा च उपस्थितमान्यवरैः सह वार्तालापः अपि एकः अद्भुतः प्रसङ्गः ।

अस्मिन्यात्रायां श्रीमान् नितिन-गोकर्णमहोदयेन द्विवारम् अयोध्यायां तथा वाराणस्यां तत्तत् स्थलमाहात्म्यं तथा च सनातनधर्मस्य तीर्थक्षेत्राणां कः सम्बन्धः इति अतीव रुचिपूर्णा व्याख्या कृता ।

इयं यात्रा न केवलं दृश्यदर्शनसुलभा (यत् आङ्ग्लभाषायां sightseeing इत्युच्यते) किन्तु भगवत्पादैः यानि आशीर्वचनानि प्रदत्तानि, तथा च अनेकविधेषु वार्तालापसमयेषु यः उपदेशः कृतः तेन इयं यात्रा न केवलं संस्मरणीया अपितु शिक्षाप्रदा अपि अभवत् । एतयोः आशीर्वचन-वार्तालापाभ्यामुत्थिता ये बिन्दवः , तेषामुपरि यात्राफलप्राप्त्यर्थं मननं कर्तव्यमेव ।

इत्यलमिदानीम् ।

शुभं भवतु ।

# उत्तरभारतयात्रा-मधुरस्मृतयः

– मूललेखः – अभिनव कल्ला , जोधपुर
अनुवादः – नीलोत्पला , जोधपुर



परमपूज्यस्वामिनाम् उत्तरभारतस्य यात्रा सूरतनगरतः आरब्धा । मम मनसि एका इच्छा आसीत् यत् मया सूरतं गत्वा स्वामिवर्याणां दर्शनं लब्ध्वा आशीर्वादः प्राप्तव्यः इति।

स्वामिनां वासः मार्च-मासस्य ५ दिनाङ्कतः ८ दिनाङ्कपर्यन्तं सूरतनगरे आसीत्। ७ तमे दिनाङ्के , शुक्रवासरे, अहं सूरतनगरं प्रति प्रस्थितवान् । तस्मिन् सायङ्काले स्वामिवर्यैः देवीपूजनं कर्तव्यम् आसीत् , अहं च उत्साहेन स्वामीदर्शनस्य प्रतीक्षाम् अकरवम् ।

गुरुवर्यैः कृतं देवीपूजनं कियत् अलौकिकम् ! एषः अनुभवः अतीव सुन्दरः आध्यात्मिकरूपेण समृद्धः चासीत् । पूजनात् अनन्तरम् आशीर्वचनम् अभवत् यस्मिन् पूज्यगुरुवर्याः ध्याने जपे च प्रगतिः कथं भवितव्या इत्युक्तवन्तः । ते 'आरोहणं' च 'आक्रमणं' च अर्थात् Assent, Establish, Progress, Master — एतासां चतुर्णाम् अवस्थानां महत्त्वं व्याख्यातवन्तः। आशीर्वचनस्य पश्चात् "शिव के समान" इत्यस्य भजनस्य सामूहिकगानं जातम्। तदनन्तरं तीर्थवितरणम् अभवत् । तस्मिन् क्षणे मया अपि स्वामिवर्यान् मेलितुं सौभाग्यं प्राप्तम् । पूज्यगुरुवर्याः सस्नेहम् अपृच्छन् , "कदा आगतः?" एषः संवादः आत्मीयानुभूत्या पूरितः जातः । एतस्य एव प्रतीक्षा मनसि अस्ति गुरुवर्याणां सान्निध्ये ।

अग्रिमे दिने प्रभाते , वयं सर्वे व्यायाम-प्राणायाम-क्रियायां भागं गृहीतवन्तः । तदनन्तरं पुनः स्वामिवर्याणाम् आशीर्वचनं श्रुतं यस्मिन् गुरुवर्यैः सत्सङ्गस्य तथैव विविधकार्यक्रमाणां द्वारा अनुस्यूतसूत्रम् अभिज्ञाय तत् जीवने कथं प्रकटितव्यमिति गुरुवर्यैः स्पष्टीकृतम् ।

सायङ्काले एकः भक्तः तस्य क्षेत्रिकगृहे शास्त्रीयसङ्गीतस्य कार्यक्रमम् आयोजितवान् । पद्मश्री-अब्दुल-राशिद-खानस्य शिष्यः श्रीगुलाम-फरीद-वोहरा अतीव मधुरं च भावपूर्णं प्रस्तुतिं कृतवान् । तेन सह आगताः अन्ये कलाकाराः गरबागीतानि प्रस्तुतवन्तः येषु सर्वे उपस्थिताः जनाः हर्षेण नृत्यं कृतवन्तः ।

पूज्यश्रीगुरुवर्याः सर्वान् कलाकारान् मेलितवन्तः तेभ्यः आशीर्वादान् दत्तवन्तः च । तदनन्तरं बहिः वयं सर्वे उद्याने उपविष्टाः । तत्र स्वामिवर्याः सर्वान् सूरत-शिबिरस्य अनुभवान् कथयितुं प्रोत्साहं दत्तवन्तः । अन्ते भजनगायनेन सभा-समाप्तिः जाता ।

एवम् उत्तरभारत-यात्रायाः अद्भुत-दिव्यः आरम्भः सफलतया सम्पन्नः ।

# मम स्मृतिपथे...

**– मूललेखः - नव्या कौशिक , जयपुर**

**अनुवादः - शरयू हल्दीपुर , मुम्बई**

श्रीचित्रापुरमठस्य एकादशमठाधीश-परमहंसपरिव्राजकाचार्य-श्रीसद्योजातशङ्कराश्रम-स्वामिनां मार्चमासे त्रयोदशदिनाङ्के मध्याह्ने प्रथमवारं जयपुरनगरं शुभागमनं जातम् । तस्मिन् शुभक्षणे, अहं मम सम्पूर्णकुटुम्बेन सह तेषां हार्दस्वागताय उपस्थिता आसम् । यदा अहं स्वामिनः प्रथमवारं दृष्टवती , तदा तेषां मुखे एकं मधुरं स्मितं दृष्ट्वा आनन्दम् अनुभूतवती । तस्मिन्नेव क्षणे तेजसः उज्ज्वलः प्रभापुञ्जः अपि लक्षितः, यः सर्वेषु आत्मीयतां , स्नेहं च प्रसारयन् आसीत्।स्वामिनां समीपे नैके वरिष्ठजनाः , भगिन्यः च , उपस्थिताः आसन् । सर्वान् मिलित्वा अहं यथार्थतया 'एषः मम एव कुटुम्बः' इति अनुभूतवती। तदा मया ज्ञातं यत् पूज्यस्वामिनः सारस्वतसमाजस्य सर्वेषां प्रतिष्ठितः गुरुः , प्रेरकः च सन्ति । अहं तु प्रथमवारम् असङ्ख्यसारस्वतानां समुदायं दृष्टवती। तेषां भक्तिं समर्पणं च दृष्ट्वा, मम अन्तःकरणे " एकतायाम् एव अखण्डता " इति भावः समागतः ।

स्वामिनां त्रिदिवसीय-यात्रायाः अवसरमध्ये अस्माभिः योग-व्यायाम-साधना-ध्यानानुष्ठान-इत्यादीनां विषये गम्भीरं शिक्षणं प्राप्तम् । मम मनसि केचन प्रश्नाः आसन् , " वयं सारस्वताः के? कुत्र अस्माकं मूलस्थानम्? " इति । एतेषां प्रश्नानाम् अपि समाधानं प्राप्तम् ।

सत्यं वदामि चेत् एतेषां त्रयाणां दिनानाम् अनुभूतिः शब्दैः विवक्तुं न शक्यते। अतिप्रभाविता अहं लक्षितवती यत् स्वामिनः सर्ववयस्कजनान् एकत्र नेतुं समर्थाः । मम सदृशानां युवकानां वाक्यानि अपि गुरुवर्याः अवधानेन शृण्वन्ति , सम्यक् अवगच्छन्ति , तेषां शङ्कानां समाधानं च कुर्वन्ति। मम तु सारस्वतसमाजेन सह सम्पर्कः तथा सम्बन्धः हर्षजनकः जातः।

अहं पूजापाठं बाल्यकालात् एव करोमि। किन्तु पूजायाः विधिः मन्त्रोच्चारणस्य पद्धतिः च, एतानि सर्वाणि मया देवी-अनुष्ठानेन , गुरुवर्यैः कृतपूजनेन एव ज्ञातानि ।

पूज्यगुरुवर्याः आत्मीयतया अस्माभिः सह मिलितवन्तः । अयं तु मम अनुभवेषु सर्वोत्तमः आसीत् ।

स्वामिनः दर्शनं केवलम् आध्यात्मिकः लाभः न अपितु समाजे ऐक्यम् आत्मीयतां नवचैतन्यं च वर्धमानम् अस्ति इति मम दृढनिश्चयः।

एषा त्रिदिनात्मिका आध्यात्मिकी, संस्कारदायिनी यात्रा मम जीवनस्य अविस्मरणीया स्मृतिरेव।

श्रीमद्गुरोः चरणारविन्दयोः श्रद्धया नमनम्।

बालरञ्जनी

# शरभेश्वरः

– सुधा कार्नाड , बेङ्गलूरु



आसीत् एकः हिरण्यकशिपुः नाम असुरः । भगवतः विष्णोः नाम श्रुत्वैव तस्य क्रोधः वर्धते स्म। तस्य पुत्रः प्रह्लादः तु विष्णोः महान् भक्तः आसीत् । सः सर्वदा विष्णुनामस्मरणे मग्नः अस्ति स्म। एतेन क्रुद्धः तस्य पिता तं मारयितुम् अनेकवारं प्रयतवान् ।


हिरण्यकशिपवे ब्रह्मणा दत्तः वरः आसीत् यस्मात् सः नरवानरैः पशुपक्षिभिः दिने वा रात्रौ वा गृहस्य बहिः वा अन्ते वा कैः अपि आयुधैः वा न हन्यते इति । बालप्रह्लादं तस्य असुरपितुः हिरण्यकशिपोः रक्षितुं भगवान् विष्णुः अर्ध-सिंहस्य अर्ध-नरस्य शरीरयुक्तं नरसिंहरूपं धारितवान्। असुरस्य हननात् अनन्तरम् अपि नरसिंहस्य क्रोधशमनं नाभवत् । तस्य आक्रोशभरितं गर्जनं सर्वेषु भीतिः अजनयत् ।

देवताः सर्वे भगवन्तं शिवम् उपगम्य तं नरसिंहस्य क्रोधोपशमनं कर्तुं प्रार्थितवन्तः।

तदा करुणामयः शिवः नरसिंहात् अपि घोररूपं धारितवान् । अष्टपादयुक्तम् अर्ध-सिंहस्य अर्ध-खगस्य च शरीरमासीत् अस्य। शिवस्य एतत् घोररूपमेव "शरभः" इति। भयोत्पादकं एतद्रूपं दृष्ट्वा नरसिंहस्य क्रोधशमनमभवत्।

तदनन्तरं शरभः घोषितवान् यत् असुरसंहरणार्थं धारितस्य विष्णोः नरसिंहरूपं तथैव स्वस्य शरभरूपं च न भिन्नमिति । अतः तदारभ्य सर्वे शिवं "शरभेश्वरः" इति नाम्ना पूजयन्ति।

## शब्दपटः




### वामतः दक्षिणम्

1) प्रह्लादस्य आराध्य देवः

2) दैत्यः शब्दस्य समानार्थकः

3) प्रह्लादस्य पिता

4) विष्णोः अवतारः

### उपरिष्टात् अधः

5) कपिः शब्दस्य समानार्थकः

6) ब्रह्मा शब्दस्य समानार्थकः

7) प्रह्लादं मारयितुं हिरण्यकशिपुः कतिवारं प्रयतवान्

8) शिवस्य अवतारः

## रुचिरा

## जलपूरिका

- विद्या कुम्टा , मुम्बई



### जलपूरिकायाः उपस्करजलम्

**साहित्यम् –**

१) हरित-मरीचानि – ५ /६ अथवा स्वादानुसारम्

२) धानेयकं पत्राणि – १ कटोरपरिमितम्

३) रोचनी / पुदीना-पत्राणि – अर्ध कटोरपरिमितम्

४) परिभृष्टाः जीरकाः – १ चमस-परिमितम्

५) श्वेतलवणम् – १ चमस-परिमितम् अथवा स्वादानुसारम्

६) कृष्णलवणम् – १ चमस-परिमितम् अथवा स्वादानुसारम्

७) तिन्त्रिणी पेषः/ रसम् – १/४ कटोरपरिमितम्

८) आर्द्रकम् – ३/४ प्रान्गुलः

९) कृष्ण-मरिची – ४ /५

10) जलम्

**कृति :**

प्राग्लिखितानां पदार्थानां पेषणं करणीयम् । एतस्मिन् पर्याप्तं शीतलं जलं योजयित्वा सम्यक् रीत्या आलोडयन्तु। उपस्करं जलं सिद्धं भवति।

### मधुरम् उपसेचनम्

**साहित्यम् –**

१) परिभृष्टाः जीरकाः – १ चमसपरिमितम्

२) तिन्त्रिणी-पेषः / रसम् – १/४ कटोरपरिमितम्

३) गुडः – १ कटोरपरिमितम्

४) उष्णोदके निमग्न-निर्बीज-खर्जूराणि – ५/६

५) जलम् – १ / २ कटोरपरिमितम्

६) श्वेतलवणम् – एकं कूर्चम्

**कृति :**

प्राग्लिखितानां पदार्थानां पेषणं करणीयम्। तदनन्तरं किञ्चित् जलं योजयित्वा चुल्लिकायाः उपरि क्वथयन्तु । मधुरम् उपसेचनं सिद्धं भवति । अन्ते लघु-पूरिकासु सुपक्व-मुद्गाः , पक्व-पिण्डिभूत-आलुक-खण्डान् , मधुरम् उपसेचनं च स्थापयित्वा , उपस्करजले निमज्ज्य रुचिकराः जलपूरिकाः परिवेषयन्तु परिवारेण सह आस्वादयन्तु च ।



# तस्मै पाणिनये नमः

– शुभदा वकनळ्ळी, टोरोन्टो
शीला कळावर , ठाणे

शिष्यौ – नमो नमः आचार्याः ।

गुरुः – स्वस्तिः अस्तु । सर्वं कुशलम् इति मन्ये । का अपि शङ्का अस्ति चेत् पृच्छन्तु ।

देवदत्तः – आम् आचार्य । अस्ति एका शङ्का । इको यणचि इति सूत्रस्य पठनम् कृतवान् । अस्य सूत्रस्य अर्थः न ज्ञातः एव ।

आचार्यः – इकः यण् भवति अचि परे इति एतस्य सूत्रस्य अर्थः ।

यज्ञदत्तः – तर्हि इक् यण् अच् नाम किम् ।

आचार्यः – वदामि । एते प्रत्याहाराः इति उच्यन्ते । प्रत्याहाराः माहेश्वरसूत्रेभ्यः निर्मीयन्ते । शिवसूत्राणि स्मर्यन्ते खलु ? उच्यन्तां सर्वाणि सूत्राणि ।

शिष्यौ – अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफ़छठथचटतव् । कपय् । शषसर् । हल् । इति माहेश्वरसूत्राणि ।

गुरुः – उत्तमम् । दृश्यताम् , अस्मिन् प्रत्येकस्मिन् सूत्रे अन्तिम-वर्णः व्यञ्जनम् अस्ति । अस्य व्यञ्जनस्य इत्-संज्ञा भवति ततः लोपश्च विधीयते । उदाहरणतः – अइउण् इति सूत्रम् गृह्णीमः । अस्मिन् सूत्रे कानि अक्षराणि अन्तर्भूतानि ? अ, इ, उ । अन्तिम-वर्णः 'ण्' वर्तते । तस्य "हलन्त्यम्" इत्यनेन सूत्रेण 'इत्'-संज्ञा भवति । "तस्य लोपः" इत्यनेन सूत्रेण लोपः च भवति । तस्य गणनं प्रत्याहारवर्णेषु न भवति । अवगतं वा ?

शिष्यौ – आम् आचार्याः ।

गुरुः – तर्हि इक् यण् अच् इति एतेषु प्रत्याहारेषु कानि वर्णानि सन्ति इति एकैकं वदन्तु ।

देवदत्तः – इक् इति प्रत्याहारे इ , उ , ऋ , लृ तथा यण् इति प्रत्याहारे य , व , र , ल इति ।

यज्ञदत्तः – अच् इति प्रत्याहारे अ, इ , उ, ऋ , लृ , ए , ओ , ऐ , औ इति।

गुरुः – शोभनम् । अच् इति अपरः प्रत्याहारः । अच् नाम सर्वे स्वराः । अच् इति प्रत्याहारं निर्मातुं कानि कानि शिवसूत्राणि गृहीतानि ?

यज्ञदत्तः – अइउण् । ऋलृक् । एओङ् । ऐऔच् । इति चत्वारि शिवसूत्राणि गृहीतानि । अइउण् इत्यस्य अ इति प्रथमवर्णात् आरभ्य ऐऔच् इत्यस्य च् इति अन्त्य-व्यञ्जनवर्ण-पर्यन्तम् अयं प्रत्याहारः । अस्मिन् सर्वे स्वराः अन्तर्भूताः । मध्ये ण् क् ङ् इति यानि व्यञ्जनानि वर्तन्ते, एतेषाम् इत्-संज्ञा भूत्वा लोपः भवति । सम्यक् वा आचार्याः ?

गुरुः – बहु उत्तमम् । भो देवदत्त अवगतं वा न वा ?

देवदत्तः – अवगतम् आचार्याः । विशिष्टवर्णानां लघुसमूहः प्रत्याहारः नाम्ना ज्ञायते । तर्हि आहत्य कति प्रत्याहाराः निर्मिताः भवन्ति ?

गुरुः – पाणिनिमहर्षिणा पाणिनीयव्याकरणे ४३ प्रत्याहाराः प्रयुक्ताः वर्तन्ते । प्रत्याहारैः पाणिनिसूत्राणां लाघवत्वं साध्यम् भवति । केवलम् अच् इति कथनेन सर्वेषां स्वराणां ग्रहणं भवति । हल् इति कथनेन सर्वाणि व्यञ्जनानि गृहीतानि ।

शिष्यौ – अधुना सम्यक् अवगतम् आचार्याः । नमस्कारः ।

गुरुः – शुभं भूयात् ।

## अविस्मरणीयः अनुभवः

**– मङ्गेश चिक्करमने , बेङ्गलूरु**

मङ्ग्ळूरुग्रामे गुरुवर्याणां चातुर्मासव्रतानन्तरं तथा शिराली-गमनात् प्राक् गुरुवर्याः सर्वेभ्यः फलमन्त्राक्षताः अददत।

फलमन्त्राक्षताग्रहणार्थं पङ्क्त्यां स्थितः अहं जनार्दन-सवनाळमहोदयम् अर्थात् जन्नामहोदयम् अवदम् ," अहमेकाकी मङ्ग्ळूरुग्रामे अस्मि । अत्र पाकं न पचामि । नारिकेलफलं मम कृते न उपयुक्तम् इति अहं गुरुवर्यान् वक्तुम् इच्छामि।"

जन्नामहोदयेन अहं प्रतिबोधितः " एकं शब्दम् अपि मा वद। यं प्रसादं लप्स्यसे, तं सम्पूर्णं स्वीकुरु। यदि नारिकेलफलं न इच्छसि , तर्हि अनन्तरं तत् पाकशालायां प्रयच्छ । किन्तु तत्र एकं शब्दम् अपि मा वद !"

समयान्तरे अहं गुरुवर्याणां सम्मुखम् उपस्थितः सन् प्रणामं कृतवान् । गुरुवर्याः मां दृष्ट्वा अवदन् " यदि नारिकेलफलं न इच्छसि तर्हि अहं तुभ्यं काश्मीरफलं ददामि। "

आश्चर्येण मम नेत्रे विस्फारिते जाते । प्रणम्य अहम् अपृच्छम् ," भवन्तः कथं जानन्ति ?"

गुरुवर्याः केवलं मन्दस्मितम् अकुर्वन् । किन्तु स्मिते मह्यम् एका शिक्षा आसीत्। " मूढमते, एषः कः प्रश्नः?त्वम् एतदपि न जानासि किम्? जपम् अधिकं कुरु!" इति।

## हास्यकणिका

**- सुजाता हळदीपुर , मुम्बई**

रुग्णः – नमस्कारः वैद्य ! अहं रामलालः। मम उदरवेदना अस्ति। कः दोषः अस्ति इति भवान् मन्यते?

वैद्यः – सुप्रभातं महोदय। किं भवान् निर्देशम् इच्छति वा निदानम् ?



रुग्णः – कः भेदः ?

वैद्यः – निर्देशः निश्शुल्कः । निदानार्थं भवता शुल्कं दातव्यम् ।

रुग्णः – अहं निर्देशम् इच्छामि ।

वैद्यः – अस्तु । मम निर्देशः अस्ति यत् निदानार्थं मम चिकित्सालयम् आगच्छतु ।

# अमूल्यरत्नं रतनटाटा

– सुधा भट कल्याणपूर , मङ्गळूरु



जगति बहवः उद्यमिनः वर्तन्ते ये प्रायः स्वलाभं लक्षीकृत्य एव व्यवसायं कुर्वन्ति। परन्तु केचन स्वव्यापारेण सह समाजकल्याणे अपि समानरुचिं पालयन्ति। श्रीरतनटाटामहोदयः एतेषु अन्यतमः , एकः प्रख्यातः भारतीयः उद्योगपतिनिवेशकः । व्यक्तिगतसफलतायाः अपेक्षया सामाजिकप्रतिबद्धतायै प्राथमिकतायाः दाता इति प्रसिद्धः । जनसामान्यं प्रति सामाजिकदायित्वस्य प्रबलभावनया सह विश्वविस्तृत-टाटासमूहस्य दूरदर्शित्वेन नेतृत्वं कृतवान् । तेन आरब्धाः संस्थाः विदेशेषु अपि सन्ति। तासु संस्थासु लक्षादयः जनाः उद्योगं प्राप्नुवन्ति। संस्थाः विविधेषु उत्पादनेषु कार्यरताः-सामान्य-लवणतः विमानपर्यन्तम्।

टाटामहोदयस्य आसक्तिः आसीत् विद्यार्जने, वैद्यकीय क्षेत्रे तथा ग्रामान्तर- उन्नतीकरणे। विज्ञानस्य संशोधनार्थं तेन अनेकाः संशोधनसंस्थाः प्रारब्धाः। यदा software उद्यमाः प्रारभन्त तदा टाटामहोदयः TCS संस्थां प्रारभ्य अनेकान् उद्योगान् सृष्टवान् । नैकान् जनान् Start-up उद्यमे धनसाहाय्यं कृतवान् ।

कालानुसारं परिवर्तनशीलः सम्भूय विज्ञानस्य पुरोगामीमार्गः एव टाटामहोदयेन अनुसृतः।

टाटामहोदयस्य पशून् प्रति प्रीतिः एकः आदर्शः एव। मुम्बईनगर्यां तेन पशुरुग्णालयं स्थापितम् अस्ति । तस्य पशुप्रेमविषये एका घटना अस्ति । प्रायः २०१८ तमे वर्षे इङ्ग्लैण्डस्य राजकुमारेण टाटामहोदयः जीवन-उपलब्धि-पुरस्कार-प्रदानार्थम् आमन्त्रितः। परन्तु टाटामहोदयः समारम्भस्य पूर्वदिने राजकुमारम् उक्तवान् "मम श्वानः, टिटो (Tito), सहसा अनारोग्येण पीडितः अभवत् , अहं तं विहाय आगन्तुं न शक्नोमि " इति। श्वानस्य अनारोग्यस्य कारणेन सः एकं प्रतिष्ठितं कार्यक्रमं त्यक्तवान्।

व्यक्तिगतजीवने टाटामहोदयः अत्यन्तसरलः विनयशीलः च आसीत् । तस्य पालनपोषणं तस्य पितामही एव कृतवती। तया प्रदत्ताः संस्काराः टाटामहोदयस्य जीवनशैलीं रूपितुं कारणम् अभवत् । सहृदयता , विनम्रता , सहानुभूतिः , अन्यान् प्रति आदरम् इत्यादयैः सद्गुणैः सम्पन्नः आसीत् सः।

विद्याभ्यासस्य कृते अमेरिकां गतः टाटामहोदयः तत्र एव उषितवान् । दशवर्षाणाम् अनन्तरं भारतदेशे स्थिता तस्य पितामही अनारोग्येण पीडिता अभवत् । सा टाटामहोदयस्य उपस्थितिम् इष्टवती। टाटामहोदयः तत्क्षणम् अमेरिकायाः समृद्धं तथा सुनियत-जीवनं त्यक्त्वा भारतं प्रत्यागतवान्। पितामह्याम् असीमप्रीत्याः अयम् एकः आदर्शः।

रतनटाटा स्वीयसंस्थानां तथा यन्त्रागाराणां समस्याः सम्मुखीकृत्य सर्वदा सरलान् परिहारान्

सूचयति स्म । एकस्मिन् समये एकस्य यन्त्रागारस्य अनुरक्षण-सभायाम् एकः कर्मचारी आक्षेपमेकं कृतवान् । तत्रस्थित-शौचालयानां निर्माल्यं प्रति सः उक्तवान् "अस्माकं कर्मचारिणां शौचालयाः मलिनाः वर्तन्ते। परन्तु ईदृशी समस्या अधिकारिणां शौचालयेषु न दृश्यते" इति । विचलितः टाटामहोदयः सम्बन्धित-अधिकारिणं पृष्टवान् , "अस्याः समस्यायाः परिहारार्थं कति समयः आवश्यकः ? " अधिकारी उक्तवान् " सप्ताहद्वयम् " । स्वस्य असम्मतिं प्रकटयित्वा टाटामहोदयः आदिष्टवान् , " केवलं दिनमेकं पर्याप्तम्। श्वः मम कार्यालयम् एकं तक्षकं प्रेषयतु " । परेद्युः आगतं तक्षकं सः आज्ञापितवान् , " अधिकारिणां शौचालयस्य तथा कर्मचारिणां शौचालयस्य चिह्नफलकस्य अद्य एव स्थानान्तरं करोतु । तथैव प्रति पक्षान्तरे पुनः फलकानां स्थानान्तरं करोतु । एतत् कार्यं सततं करणीयम् । " ततः परं कर्मचारिणां शौचालयाः सदा स्वच्छाः शुभ्राः च भवन्ति स्म ।

कार्यक्षेत्रेषु समस्याः आगच्छन्ति एव। परन्तु तेषां दृत-परिहारस्य क्षमता उत्तमनायकस्य प्रमुखलक्षणेषु एकम् इति इदम् उदाहरणमेकम् ।

टाटामहोदयस्य राष्ट्रं प्रति प्रेम तु उल्लेखनीयम् एव। राष्ट्रे कापि विपत्तिः आपततु – आतङ्कः , अतिवृष्टिः , अनावृष्टिः , भूकम्पनं , चण्डमरुतः , सुनामी वा – तस्मिन् सङ्कटसमये तस्य जनधनबलस्य साहाय्यं निश्चितरूपेण भवति स्म । साहाय्यं न केवलं तात्कालिकम् अपि तु समग्रं पुनर्वसनपर्यन्तं भवति स्म। पीडितानां कृते आहार- जल-विद्युत्-शाला-रुग्णालयादीनां व्यवस्था अपि भवति स्म।

२६ /११/२००८ भारतस्य इतिहासे कृष्णवर्णीयः दिवसः। एतस्मिन् दिने एव पाकिस्तानस्य आतङ्किनैः मुम्बईनगर्याम् आक्रमणं कृतम् । ते टाटासङ्कुलस्य ताजभवनं लक्षीकृत्य गोलिकानां प्रहारं कृतवन्तः । ध्वनिसम्मर्दस्य कारणेन दूरवाणिद्वारा विवरणं प्राप्तुं न शक्यम् इति ज्ञात्वा टाटामहोदयः स्वयं ताजभवनं प्रति गतवान् । परन्तु प्रवेशद्वारस्य पुरतः एव सः सुरक्षादलेन अन्तः गन्तुम् अवरोधितः। अनलधूमेन व्याप्तं ताजभवनं दृष्ट्वा तथा निरन्तरं प्रचलन्तं गोलिकाप्रहारं श्रुत्वा विचलितः प्रक्षुब्धः ७० वर्षीय टाटामहोदयः सम्पूर्णत्रीणि दिनानि ताजभवनद्वारे एव तिष्ठन् आसीत् । तस्य प्रमुखा चिन्ता आसीत् भवने स्थितकार्यकर्तृणां तथा अतिथिगणानां योगक्षेमम् ।

तस्मिन् समये टाटामहोदयेन तथा उपाहारगृहस्य कर्मचारिभिः प्रदर्शिताः धैर्य-स्थैर्य-क्षमतादयः प्रशंसनीयाः । ताजभवने स्थितसर्वेषां सुरक्षिततया भवनस्य बहिः प्रेषणं , क्षतविक्षतानां शुश्रूषा , दिवङ्गतानां कुटुम्बानां कृते आर्थिकसाहाय्यम् इत्यादीनां व्यवस्थाः अपि सः कृतवान् । आतङ्किनाम् आक्रमणात् अनन्तरम् अल्पसमये एव ताजभवन-सङ्कुलस्य क्षतविक्षत-अंशानां पुनर्निर्माणम् अपि सः कृतवान् ।

टाटामहोदयः भारतदेशस्य उन्नयनं प्रति एव चिन्तयन् आसीत् । अस्माकं भारतदेशेन जगति अग्रस्थानं प्राप्तव्यम् इति तस्य सर्वदा प्रयासः आसीत् । टाटामहोदयस्य विनयशीलता , देशभक्तिः, दूरदृष्टिः , कार्यक्षमता इत्यादयः सर्वे अनुकरणीयाः सद्गुणाः। तस्य व्यक्तिमत्वं , गुणविशेषाः च आगामियुवकान् आदर्शपथि नयन्ति एव ।

वयसः ८६ वर्षे रतनटाटामहोदयः दिवङ्गतः । भारतदेशस्य एकम् अमूल्यरत्नं विलुप्तम् । तस्य निधनसमये प्रेषितेषु शोकसन्देशेषु एकः सन्देशः आसीत् , RIP – Return If Possible (शक्यं चेत् पुनरागच्छतु इति।)

## योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , बेङ्गलूरु**



### भद्रासनम्

एतद् आसनं शयित्वा, उपविश्य वा क्रियते।

**कृतिः –**
आसनोपरि उपविश्य पादौ पृष्ठवंशं च सर्वाणि सरलानि उच्छ्रितानि स्थापनीयानि। श्वसनप्रक्रिया प्रचलन्ती एव स्यात्। जानुनी भङ्गीकृत्य पदद्वयम् एकत्र आनीय पादतले परस्परं योजयतु। द्वाभ्यां हस्ताभ्याम् आत्मनः पादतले गृहीत्वा पादयोः पार्ष्णी अस्मद्दिशि यावत् शक्यम् आकृष्टव्ये । अनन्तरं जानुनी १० वारतः ५० वारम् उपर्यधश्च विलोलयतु । जानुनी अधिकतरं पृथ्वीपर्यन्तं नयतु । श्वसनक्रियाम् अनुसृत्य एव एतदासनमनुवर्तयतु ।

पादौ शिथिलावस्थायां स्थापयित्वा एतदेव आसनं शयित्वा अपि कर्तुं शक्यते। हस्तौ उदरे अथवा देहम् उभयतः स्थापयित्वा अपि कर्तुं शक्यमिति।

**लाभाः –**
अस्य नैके लाभाः सन्ति। तेषु केचन अधोदत्ताः सन्ति। मनसः चञ्चलतां समाप्य एकाग्रता वर्धते। पचनशक्तिः अपि वर्धते। पादयोः स्नायवः बलशालिनः भवन्ति । पृष्ठवंशः अपि बलयुतः भवति। वस्तिः नाम्या भवति ।

**वर्ज्यम् –**
जानु-कटी-गुल्फ-वेदना येषाम् अस्ति तैः एतदासनं न करणीयम्। यद्यपि करणीयमिति चिन्त्यते तर्हि वैद्योक्तरीत्या कर्तुं शक्यते।

## उत्तराणि

### शब्दपटः

**१ – भगवान् विष्णुः २– असुरः ३ – हिरण्यकशिपुः ४ – नरसिंहः ५ – वानरः ६ – विभुः ७ – अनेकवारम् ८ – शरभः**

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति । पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form